 Seat No. | | | | | |

Time : 1½ Hours

**SANSKRIT COMPOSITE (S.L.)**

**Subject Code**

| S | 1 | 6 | 3 |
|---|---|---|---|

**Total No. of Questions : 5** **(Printed Pages : 8)** **Maximum Marks : 40**

***INSTRUCTIONS :***

(*i*) सर्वेषां प्रश्नानाम् उत्तराणि नवीनपृष्ठे लेखनीयानि।

(*ii*) प्रश्नानाम् क्रमाङ्का:, उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि।

(*iii*) सर्वे प्रश्ना: अनिवार्या: सन्ति।

(*iv*) सम्पूर्णे उत्तरपत्रे एकस्या: एव स्वभाषाया: उपयोग: करणीय:।

(*v*) दक्षिणभागे दार्शिताङ्का: गुणाङ्का: सन्ति। (स्वभाषा नाम—हिंदी, मराठी, कोंकणी आङ्गलभाषा च।)

**प्रथमखंडः (पठितावबोधनम्)**

1. (क) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत। 3

भाऊसाहेब: एक: निपुण: क्रीडापटुरपि आसीत्। स: 'क्रिकेट' क्रीडां 'फुटबॉल' क्रीडां च क्रीडति स्म। स: नैकानां क्रीडापटूनामपि साहाय्यम् अकरोत्। स: दानवीर: अप्यासीत्।

**प्रश्नाः —**

(1) भाऊसाहेबः कीदृशः क्रीडापटुः आसीत् ?

(2) भाऊसाहेबः के क्रीडे क्रीडति स्म ?

(3) सः केषां साहाय्यम् अकरोत् ?

(ख) अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत। 2

बालो वा यदि वा वृद्धो युवा वा गृहमागतः।

तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः॥

मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।

दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः॥

**प्रश्नाः —**

(1) कस्य पूजा विधातव्या ?

(2) मनुजाः केन बहून् विषयान् बोधन्ते ?

(ग) **एकस्य** गद्यखण्डस्य स्वभाषया अनुवादं लिखत। 2

(अ) सलीमः — अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

देवेशः — अस्माकं ध्वजे एते त्रयः एव वर्णाः कथं गृहीताः ?

सलीमः — एतेषां त्रयाणां वर्णानाम् अत्र विशेषः अभिप्रायः।

देवेशः — कः विशेषः ?

(आ) अहं नदी अस्मि। सरित्, तटिनी, गङ्गा, निम्नगा इत्यादीनि मम अन्यानि नामानि। प्रारम्भे 'महानदी' (महादई) इति नाम्ना प्रसिद्धाऽहम् अग्रे माण्डवी नाम्ना विख्यातास्मि।

(घ) वाक्यांशयोः मेलनं कुरुत। 1

| | | |
|---|---|---|
| (1) | अहं जनानां | – खनिजवहनं क्रियते। |
| (2) | यान्त्रिकपोतैः | – माता अस्मि। |
| | | – जीवनदायिनी अस्मि। |

2. (ङ) **एकस्य** पद्यखण्डस्य अनुवादं स्वभाषया लिखत। 2

(अ) चिन्तनीया हि विपदामादावेव प्रतिक्रिया।

न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे॥

(आ) वृथाभ्रमणकुक्रीडा परपीडापभाषणैः।

कालक्षेपो न कर्तव्योः विद्यार्थी वाचनं श्रयेत्॥

(च) **एकस्य** प्रश्नस्य उत्तरं स्वभाषया लिखत। 2

(अ) सुविचार्य विधातव्यम् – पाठस्य तात्पर्यं लिखत।

(आ) चन्द्रेश्वरपर्वतशिखरं वर्णयत।

(छ) पूर्णवाक्येन संस्कृतभाषया उत्तरं लिखत। 2

(अ) नद्याः जलं के प्रदूषयन्ति ?

(आ) जलप्रवाहानां जलं कीदृशं विद्यते ?

(ज) सुभाषितं शुद्धं पूर्णं च लिखत। 2

शतेषु जायते ...................................... ॥

## द्वितीयखंडः (अपठितावबोधनम्)

3. (झ) अधः दत्तं गद्यखण्डं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 3

वर्षाकाले गगने मेघाः भवन्ति। ते गर्जन्ति। सौदामिन्यः स्फुरन्ति। सर्वत्र जलं भवति। वर्षाकाले मण्डूकाः रटन्ति। मयूराः नृत्यन्ति। वृक्षाः पल्लविताः भवन्ति। कृषकाः कृषिं कुर्वन्ति। ते क्षेत्रेषु बीजानि वपन्ति। ते प्रसन्नाः भवन्ति। वर्षाकाले सर्वे प्रसन्नाः सन्ति।

**प्रश्नाः —**

(अ) वर्षाकाले मेघाः किं कुर्वन्ति ?

(आ) वर्षाकाले कृषकाः कथं भवन्ति ?

(इ) वर्षाकाले मण्डूकाः किं कुर्वन्ति ?

(ञ) **एकं** परिच्छेदं स्वभाषया अनुवदत। 3

(अ) वयं सर्वे भारतदेशे निवसामः। अस्माकं नामानि, राज्यानि, नगराणि च भन्नानि। अस्माकं मातृभाषा अपि भिन्ना। अस्माकं वेशाः, धर्माः अपि भिन्नाः। किन्तु अस्माकं राष्ट्रध्वजः, राष्ट्रभाषा तथा राष्ट्रगीताम् एकं अस्ति।

(आ) पृथ्वी कश्चित् ग्रहः अस्ति। सूर्यमण्डले पृथ्वी तृतीये क्रमाङ्के स्थिता अस्ति। पृथिव्यां वायुः जलं च अस्ति। अतः पृथिव्यां जीवनम् अस्ति। पृथिव्यां वृक्षाः, पशवः, पक्षिणः जन्तवः च सन्ति। एतस्याः पृथिव्या रक्षणम् अस्माकं कर्तव्यं अस्ति।

## तृतीयखंडः (व्याकरणम्)

4. (ट) रिक्तस्थानेषु उचितानि पदानि कोष्ठकात् चित्वा लिखत। 2

(अ) पर्वतशिखरं .............................. शोभते। (मन्दिरं/मन्दिरेण)

(आ) पर्वतशिखरं गन्तुं .............................. मार्गौ स्तः। (द्वौ/द्वे)

(ठ) सूचनांनुसारं **द्वयोः** वाक्ययोः परिवर्तनं कृत्वा लिखत। 2

(अ) बालकः कथां अलिखत्। [लट्लकारे (वर्तमानकाले) परिवर्तयत]

(आ) अस्माकं पाठ्यपुस्तके (8) पाठाः सन्ति। (सङ्ख्यावाचि पदं लिखत)

(इ) माधवः भार्याः अकथयत्। (वाक्यं संशोध्य लिखत)

(ई) गृहे बालकाः वसन्ति। (वाक्यं एकवचने परिवर्तयत)

(ड) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत। 2

(अ) सः गाम् अपूजयत्।

(आ) सः जनैः सह वात्सल्येन व्यवहरति स्म।

(ढ) तालिकायां रिक्तस्थानेषु समस्तपदं विग्रहवाक्यं समासनाम वा लिखत। 2

| | **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| (अ) | सोपानमार्गः | सोपानानां मार्गः | ............................ |
| (आ) | अज्ञानं | ............................ | नञ् तत्पुरुषः |

(ण) विलोमपदानि लिखत। (**एकम्**) 1

(अ) प्राचीनः

(आ) साहाय्यम्।

(त) पर्यायपदानि लिखत। (**एकम्**) 1

(अ) पुष्पम्

(आ) मनुजः

## चतुर्थखंडः (रचना)

5. (थ) कोष्ठकात् उचितपदानि चित्वा **द्वे** सार्थकवाक्ये लिखत। 2

| | | |
|---|---|---|
| (अ) वृक्षे | रोटिकां | गायति। |
| (आ) गायिका | खगाः | पचति। |
| (इ) माता | गीतं | निवसन्ति। |

(द) मञ्जूषातः उचितानि पदानि रिक्तस्थाने योजयित्वा संवादपूर्तिं कृत्वा लिखत। 4

(कति, शुभाशयाः, करोति, परीक्षा)

ध्रुवः – पवन! भवान् किं .............................................. ?

पवनः – अहं अभ्यासं करोमि।

ध्रुवः – परीक्षा अस्ति वा ?

पवनः – आम्, श्वः संस्कृत .............................................. अस्ति।

ध्रुवः – .............................................. वादने अस्ति परीक्षा ?

पवनः – प्रातः दशवादने अस्ति।

ध्रुवः – अस्तु! भवतः परीक्षायाः कृते ..............................................।

(ध) चित्रम् आधृत्य चत्वारि वाक्यानि लिखत। 2

(शिक्षिका, छात्राः, पठन्ति, पुस्तकानि, फलकम्)

